# 9. सुभाषितानि -2



आलस्यं हि मनुष्याणां शरीरस्थो महारिपुः ।
नास्त्युद्यमसमो बन्धुः कृत्वा यं नावसीदति।।

संख्याक्रमानुसारेण अन्वयस्य पूर्तिः अधःप्रदत्ते स्थाने करणीया।

(1) आलस्यं हि (4) महारिपुः (अस्ति) (7) नास्ति (3) शरीरस्थः (10) न अवसीदति (2) मनुष्याणां (5) उद्यम समः (6) बन्धुः (8) यं (9) कृत्वा (जनः)

**अन्वयः**

..........................................................................................

..........................................................................................

..........................................................................................

# अनुशीलनम्

1. **आम् अथवा न इति लिखत।**

    (i) किम् उद्यमसमानः बन्धुः नास्ति?

    (ii) किम् आलस्यं मनुष्याणां मित्रम् अस्ति?

    (iii) किम् उद्यमं कृत्वा जनः सुखम् अनुभवति?

    (iv) शरीरे तिष्ठति इति शरीरस्थम्। किम् इदं शुद्धम?

2. **अधोलिखित-प्रश्नानाम् उत्तराणि एकेन पदेन लिखत।**

    (i) कः महारिपुः अस्ति?

    (ii) आलस्यं कुत्र तिष्ठति?


    (iii) कः मनुष्याणां बन्धुः?

    (iv) किं कृत्वा जनः जीवने अवसादं न प्राप्नोति?

3. **रेखाङ्कित-पदम् आदाय प्रश्ननिर्माणं कुरुत।**

    (i) **आलस्यं** मनुष्याणां महारिपुः ।

    (ii) उद्यमेन समः **बन्धुः** नास्ति।





अनाहूतः प्रविशति अपृष्टो बहु भाषते।
अविश्वस्ते विश्वसिति मूढचेता नराधमः ॥

संख्याक्रमानुसारेण अन्वयस्य पूर्तिः अधःप्रदत्ते स्थाने करणीया।

(2) प्रविशति (4) बहु भाषते (1) (यः) अनाहूतः (8) नराधमः (कथ्यते) (6) विश्वसिति (सः) (3) अपृष्टः (5) अविश्वस्ते (7) मूढचेताः

**अन्वयः**

..........................................................................................

..........................................................................................

..........................................................................................

# अनुशीलनम्

1. **'आम्' अथवा 'न' इति लिखत।**

   (i) किं ज्ञानिजनः अनाहूतः प्रविशति?

   (ii) किं नराधमः अविश्वस्त-जने विश्वासं करोति?

   (iii) किं नरोत्तमः अपृष्टः अधिकं भाषते?

2. **अधोलिखित-प्रश्नानाम् उत्तराणि एकेन पदेन लिखत।**

   (i) कः अनाहूतः प्रविशति?

   (ii) कः नराधमः?

   (iii) नराधमः कदा बहु भाषते?

   (iv) नराधमः कस्मिन् विश्वसिति?

3. **रेखाङ्कितपदम् अधिकृत्य प्रश्ननिर्माणं कुरुत।**

   (i) **नराधमः** अनाहूतः प्रविशति।

   (ii) मूढचेताः **अविश्वस्ते** विश्वसिति।


   (iii) **नरोत्तमः** पृष्टः भाषते।

   (iv) **सज्जनः** आहूतः प्रविशति।

**विलोमार्थपदैः सह मेलयत।**

*उत्तराणि*

| | |
|---|---|
| अनाहूतः | पृष्टः |
| अपृष्टः | नरोत्तमः |
| नराधमः | आहूतः |



अयं निजः परो वेति गणना लघुचेतसाम्।
उदारचरितानां तु वसुधैव कुटुम्बकम्।।

संख्याक्रमानुसारेण अन्वयस्य पूर्तिः अधःप्रदत्ते स्थाने करणीया।

(1) अयं (5) गणना (8) कुटुम्बकम् (6) उदारचरितानां तु (2) निजः (7) वसुधा एव (3) परः वा इति (4) लघुचेतसां

**अन्वयः**

..........................................................................................

..........................................................................................

..........................................................................................

# अनुशीलनम्

1. **'आम्' अथवा 'न' इति लिखत।**

   (i) लघुचेताः वसुधैव कुटुम्बकम् इति चिन्तयति।

   (ii) उदारचरितः अयं निजः, अयं परः इति न गणयति।

   (iii) उत्तमजनः सदा पूजनीयः ।

2. **अधोलिखित-प्रश्नानाम् उत्तराणि एकेन पदेन लिखत।**

   (i) केषां वसुधैव कुटुम्बकम्?

   (ii) लघुचेताः कीदृशो भवति?

3. **समानार्थक-पदैः सह मेलयत**

| | | उत्तराणि |
|---|---|---|
| निजः | भूमिः | --------- |
| वसुधा | साधुः | --------- |
| उदारचरितः | आत्मीय | --------- |
| कुटुम्बकम् | अल्पमतिः | --------- |
| लघुचेताः | परिवारः | --------- |

## 4. विशेषण-विशेष्य-मेलनं कुरुत।

| | | |
|---|---|---|
| परमं | महारिपुः | ---------- |
| शरीरस्थः | धर्मः | ---------- |
| मूढचेताः | तपः | ---------- |
| परमः | नराधमः | ---------- |



सुखार्थी चेत् त्यजेत् विद्यां विद्यार्थी चेत् त्यजेत् सुखम्।
सुखार्थिनः कुतो विद्या कुतो विद्यार्थिनः सुखम्।।

संख्याक्रमानुसारेण अन्वयस्य पूर्तिः अधःप्रदत्ते स्थाने करणीया।

(2) चेत् (4) त्यजेत् (1) सुखार्थी (3) विद्यां (6) सुखं (5) विद्यार्थी चेत् (7) त्यजेत् (10) कुतः (8) सुखार्थिनः (13) कुतः (12) सुखं (9) विद्या (11) विद्यार्थिनः

**अन्वयः**

..........................................................................................

..........................................................................................

..........................................................................................

# अनुशीलनम्

**1. 'आम्' अथवा 'न' इति लिखत।**

1. किं सुखार्थी विद्यां त्यजेत्?
2. किं विद्यार्थी सुखं त्यजेत्?
3. किं सुखार्थी विद्यां न प्राप्नोति?

**2. अधोलिखित-प्रश्नानाम् उत्तराणि एकेन पदेन लिखत।**

1. कः सुखं त्यजेत्?
2. सुखार्थी किं त्यजेत्?
3. विद्या कस्य न भवति?

**3. समानार्थकपदैः मेलयत।**

| | *उत्तराणि* |
|---|---|
| विद्यार्थी | वर्जयेत् |
| त्यजेत् | छात्रः |

**4. रेखाङ्कितपदम् अधिकृत्य प्रश्ननिर्माणं कुरुत।**

1. **सुखार्थी** विद्यां त्यजेत्।
2. विद्यार्थी **सुखं** त्यजेत्।